अथ शपथः ।

नारदः ।

"युक्तिष्वप्यवसन्नासु शपथैरेनमर्द्दयेत् ।
अर्थकालबलापेक्षमग्न्यम्बुसुकृतादिभिः ॥"

एनं विचार्य्यमाणमर्थं अर्द्दयेत् पीड़येन्निर्णयेदित्यर्थः । अर्थस्य विवादास्पदस्य बलं बड़त्वभावः कालस्य च बलं पुण्यापुण्यत्वं तदपेक्षं यथा स्यादित्यर्थः । भूदूर्व्वाकरत्वस्य पुत्त्रादिशिरःस्पर्शस्य चार्थे दर्शनीयत्वात् । अथ मयैतत् कृतं न वेति प्रतिज्ञासत्यार्थायौ जले वा हस्तं प्रक्षिपेत् । एतस्मिन्नर्थे मम सुकृतं नश्येदिति वा ब्रूयात् । न त्वग्निपरीक्षां जलपरीक्षां वा कुर्य्यात् इत्यभिप्रायवर्णनं युक्तं तस्या महाभियोगविषयकत्वेन शपथसमभिव्याहारानर्हत्वात् । सुकृतादिभिरित्यादिना दूर्व्वासद्यासुपग्रहः । तथा च विष्णुः ।

"सर्व्वेष्वर्थजातेषु मूल्यं स्वर्णं प्रकल्पयेत् ।"

तत्र कृष्णलोने शूद्रं दूर्व्वाकरं ग्राहयेत् । द्विकृष्णलोने तिलकरं त्रिकृष्णलोने जलकरं चतुःकृष्णलोने स्वर्णकरं पञ्चकृष्णलोने सीतोद्धृतमहीकरं सुवर्णार्द्धोने कोशो देयः शूद्रस्य यथाक्रमे विहिता क्रिया तथा द्विगुणेऽर्थे राजन्यस्य त्रिगुणेऽर्थे वैश्यस्य चतुर्गुणेऽर्थे ब्राह्मणस्येति । कृष्णलः काञ्चनरक्तिका तन्मूल्यादूने कृष्णलोने । एवमन्यत्र । मनुः ।

"सत्येन शापयेद्विप्रं क्षत्त्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः ।
पुत्त्रदारस्य वाप्येवं शिरांसि स्पर्शयेत् पृथक् ॥"

ब्राह्मणेन मयैतत् कृतं न कृतं वेति प्रतिज्ञासत्यार्थं सत्यमिति वक्तव्यम् । तथैव क्षत्त्रियेण वाहनायुधं स्प्रष्टव्यम् । तथैव वैश्येन गोबीजकाञ्चनानामन्यतमं स्प्रष्टव्यम् । शूद्रेण तु पूर्व्वोक्तं सर्व्वमेव स्प्रष्टव्यं तेषां तथाकृतस्पर्शानां पातकहेतुत्वात् पातकशब्देन निर्द्देशः । कृत्वायुधोऽप्येवम् ॥ * ॥ दैवक्रियाविषयमाह नारदः ।

"अरण्ये निर्ज्जने रात्रावन्तर्व्वेश्मनि साहसे ।
न्यासापहरणे चैव दिव्या सम्भवति क्रिया ॥"

बृहस्पतिः ।

"देवब्राह्मणपादांश्च पुत्त्रदारशिरांसि च ।
एते तु शपथाः प्रोक्ता मनुना स्वल्पकारणे ।
साहसेष्वभिशापे च दिव्यानि तु विशोधनम् ॥"

अत्र शपथदिव्ययोः पृथक्प्रतीतिः । शपथे न दिव्यधर्म्माः किन्तु वधे कर्म्मणि तत्र शौचार्थं स्नानाचमनादिमात्रं कार्य्यम् । दिव्यानि तु दिव्यतत्त्वे कथितानि नात्र लिखितानि । अनाभियुक्तेन शपथः कर्त्तव्य इत्युत्सर्गः ॥ * ॥ उभयेच्छयाभियोक्तापीत्याह नारदः ।

"अभियोक्ता शिरोवर्त्ती सर्व्वत्रैव प्रकीर्त्तितः ।
इच्छयान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ॥"

इतरः शपथकर्तृभिन्नः । तथा कात्यायनः ।

"आचतुर्द्दशकादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स ज्ञेयः शपथे शुचिः ॥"

व्यसनमापत् । घोरमतिपीड़ाकरम् । तथा च कोषाधिकारे यस्य पश्येदित्यनुवृत्तौ विष्णुः ।

"रोगोऽग्निर्ज्ञातिमरणं राजातङ्कमथापि वा ।
तमशुद्धं विजानीयात् तथा शुद्धं विपर्य्ययात् ॥"

कात्यायनः ।

"तस्यैकस्य न सर्व्वस्य जनस्य यदि सम्भवेत् ।
रोगोऽग्निर्ज्ञातिमरणमृणं दद्यात् दमञ्च सः ॥
ज्वरातिसारविस्फोटगूढ़ास्थिपरिपीड़नम् ।
नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते ।
शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणाम् ॥"

तस्यैकस्येति न तु देशव्यापकमरणादिः । मनुः ।

"न वृथा शपथं कुर्य्यात् स्वल्पेऽप्यर्थे नरो बुधः ।
वृथा हि शपथं कुर्व्वन् प्रेत्य चेह च नश्यति ।
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥"

कामिनीष्विति रहसि कामिनीसन्तोषार्थं वृथाशपथे एवं विवाहसिद्ध्यर्थं गोग्रासार्थं आवश्यकहोमेन्धनार्थं ब्राह्मणरक्षार्थमङ्गीकृतधनादौ । यमः ।

"वृथा तु शपथं कृत्वा कौटस्य वधसंयुतम् ।
अनृतेन च युज्येत वधेन च तथा नरः ।
तस्मान्न शपथं कुर्य्यान्नरो मिथ्यावधेप्सितम् ॥"

कौटस्येति प्राणिमात्रोपलक्षणं तद्वधपापेन वृथाशपथकर्त्ता युज्यत इत्यर्थः ॥

अथ निर्णयः ।

तत्र नारदः ।

"यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥
स्वयमभ्युपपन्नोऽपि स्वचर्य्यावसितोऽपि सन् ।
क्रियावसन्नोऽप्यर्हेत परं सभ्यावधारणम् ।
सभ्यैरवधृतः पश्चात् स शास्यः शास्त्रमार्गतः ॥"

यस्य वादिनः प्रतिवादिनो वा साक्षिण इत्युपलक्षणम् । साक्षिलिखितयुक्तिशपथानां मध्येऽन्यतमप्रमाणं यस्य प्रतिज्ञायाः सत्यत्वप्रतिपादकं स एव जयी अन्यथा पराजित इति प्रत्येतव्यम् । स्वयमभ्युपपन्नः आत्मनैवाङ्गीकृतस्वपराजयः स्वचर्य्यावसितः कम्पस्वेदवैवर्ण्यादिना पराजितत्वेनावधृतः । क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः । परमनन्तरं सभ्यावधारणमर्हेत सभासदां मिलितानामयं पराजित इति निर्णयमर्हेत । आकाङ्क्षित स शास्त्रविधिना शास्यः ॥ * ॥ निर्णयस्य फलमाह बृहस्पतिः ।

"प्रतिज्ञाभावनाद्वादी प्राड्विवाकादिपूजनात् ।
जयपत्रस्य चादानात् जयी लोके निगद्यते ॥"

जयपत्रस्य लिखनप्रकारमाह स एव ।

"यद्वृत्तं व्यवहारेषु पूर्व्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ।
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने पत्रं जयपत्रं तदुच्यते ॥"

कात्यायनः ।

"अर्थिप्रत्यर्थिवाक्यानि प्रतिसाक्षिवचस्तथा ।
निर्णयश्च तथा तस्य यथा चावधृतं स्वयम् ॥
एतद्यथाक्षरं लेख्यं यथापूर्व्वं निवेशयेत् ।
सभासदश्च ये तत्र धर्म्मशास्त्रविदस्तथा ॥"

ततश्च भाषोत्तरे क्रिया च पक्षसाक्ष्यादिकं निर्णयो जयपराजयावधारणं निर्णयकालावस्थितमध्यस्थाश्चेत्यादिकं सर्व्वं लेखनीयं निरूपणस्य सम्यक्त्वप्रदर्शनार्थम् । तथाहि भाषोत्तरलिखनं हेत्वन्तरेण पुनर्न्यायप्रत्यवस्थाननिषेधार्थं नहि न गृहीतमिति मिथ्योत्तरेण पराजितस्य पुनः परिशोधितं मयेति प्रत्यवस्थानं सम्भवति । प्रमाणलिखनन्तु पुनः प्रमाणान्तरेण न्यायनिषेधार्थम् । तदाह कात्यायनः ।

"क्रियां बलवतीं त्यक्त्वा दुर्ब्बलां योऽवलम्बते ।
स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात् क्रियाम् ॥
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत् ॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णीतव्यवहाराणां प्रमाणमफलन्तथा ॥"

निर्णयोत्तरकृत्यमाह मनुः ।

"अर्थेऽपव्ययमानन्तु कारणेन विभावितम् ।
दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः ॥"

अपव्ययमानं अपलपन्तं कारणेन साक्ष्यादिप्रमाणेन । याज्ञवल्क्यः ।

"ज्ञात्वापराधं देशञ्च कालं बलमथापि वा ।
वयः कर्म्म च वित्तञ्च दण्डं दण्ड्येषु दापयेत् ॥"

मनुः ।

"तीरितं चानुशिष्टञ्च यत्र क्वचन सम्भवेत् ।
कृतं तद्धर्म्मतो विद्यात् न तत् भूयो निवर्त्तयेत् ॥"

अनुशिष्टं साक्ष्यादिनिर्णीतं अतएव तीरितं प्राड्विवाकादिभिः समापितम् । तद्विवादपदं पुनर्न निवर्त्तयेदित्यर्थः । यत्र तीरितानुशिष्टयोरप्यधर्म्मकृतत्वं प्रत्यवतिष्ठते । तत्र पुनर्न्यायदर्शनमाह नारदः ।

"तीरितं चानुशिष्टञ्च यो मन्येत विधर्म्मतः ।
द्विगुणं दण्डमादाय तत् कार्य्यं पुनरुद्धरेत् ॥"

असद्विचारे तु विचारान्तरमाह स एव ।

"असाक्षिकन्तु यद्दृष्टं विमार्गेण च तीरितम् ।
असम्मतमतैर्द्दृष्टं पुनर्द्दर्शनमर्हति ॥"

असाक्षिकमित्यप्रमाणकोपलक्षणम् । याज्ञवल्क्यः ।

"दुर्द्दृष्टांस्तु पुनर्द्दृष्ट्वा व्यवहारान्नृपेण तु ।
सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं दमम् ॥
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः ।
स्वचर्य्यावसितानान्तु नास्ति पौनर्भवो विधिः ॥"

साक्षिवचनेन सभ्यावधारणेन च प्राप्तावसादानां पुनर्न्यायदर्शनम् । स्वव्यापारेण विरुद्धभाषादिना प्राप्तावसादानान्तु नास्ति पुनर्न्यायः । बृहस्पतिरपि ।